श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ त्रिसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिसप्ततितमः सर्गः ॥

## श्रीरामलक्ष्मणौ प्रति ऋष्यमूकपम्पासरोवरयोर्मार्गं वर्णयित्वा मतङ्गमुनेर्वनस्याश्रमस्य परिचयं दत्त्वा दिव्यरूपस्य कबन्धस्य ततः प्रस्थानम्

दर्शयित्वा तु रामाय सीतायाः परिमार्गणे।
वाक्यमन्वर्थमर्थज्ञः कबन्धः पुनरब्रवीत्॥ **3.73.1** ॥

एष राम शिवः पन्था यत्रैते पुष्पिता द्रुमाः।
प्रतीचीं दिशमाश्रित्य प्रकाशन्ते मनोरमाः॥ **3.73.2** ॥

जम्बूप्रियालपनसा न्यग्रोधप्लक्षतिन्दुकाः।
अश्वत्थाः कर्णिकाराश्च चूताश्चान्ये च पादपाः॥ **3.73.3** ॥

धन्वना नागवृक्षाश्च तिलका नक्तमालकाः।
नीलाशोकाः कदम्बाश्च करवीराश्च पुष्पिताः॥ **3.73.4** ॥

अग्निमुख्या अशोकाश्च सुरक्ताः पारिभद्रकाः।
तानारुह्याथवा भूमौ पातयित्वा च तान् बलात्॥ **3.73.5** ॥

फलान्यमृतकल्पानि भक्षयित्वा गमिष्यथः।
तदतिक्रम्य काकुत्स्थ वनं पुष्पितपादपम्॥ **3.73.6** ॥

नन्दनप्रतिमं त्वान्यत् कुरवस्तूत्तरा इव।
सर्वकालफला यत्र पादपा मधुरस्रवाः॥ **3.73.7** ॥

सर्वे च ऋतवस्तत्र वने चैत्ररथे यथा।
फलभारनतास्तत्र महाविटपधारिणः॥ **3.73.8** ॥

शोभन्ते सर्वतस्तत्र मेघपर्वतसन्निभाः।
तानारुह्याथवा भूमौ पातयित्वाथवा सुखम्॥ **3.73.9** ॥

फलान्यमृतकल्पानि लक्ष्मणस्ते प्रदास्यति।
चङ्क्रमन्तौ वराञ्शैलाञ्शैलाच्छैलं वनाद् वनम्॥ **3.73.10** ॥

ततः पुष्करिणीं वीरौ पम्पां नाम गमिष्यथः।
अशर्करामविभ्रंशां समतीर्थामशैवलाम्॥ **3.73.11** ॥

राम सञ्जातवालूकां कमलोत्पलशोभिताम्।
तत्र हंसाः प्लवाः क्रौञ्चाः कुरराश्चैव राघव॥ **3.73.12** ॥

वल्गुस्वरा निकूजन्ति पम्पासलिलगोचराः।
नोद्विजन्ते नरान् दृष्ट्वा वधस्याकोविदाः शुभाः॥ **3.73.13** ॥

घृतपिण्डोपमान् स्थूलांस्तान् द्विजान् भक्षयिष्यथः।
रोहितान् वक्रतुण्डांश्च नलमीनांश्च राघव॥ **3.73.14** ॥

पम्पायामिषुभिर्मत्स्यांस्तत्र राम वरान् हतान्।
निस्त्वक्पक्षानयस्तप्तानकृशानैककण्टकान्॥ **3.73.15** ॥

तव भक्त्या समायुक्तो लक्ष्मणः सम्प्रदास्यति।
भृशं तान् खादतो मत्स्यान् पम्पायाः पुष्पसञ्चये॥ **3.73.16** ॥

पद्मगन्धि शिवं वारि सुखशीतमनामयम्।
उद्धृत्य स तदाक्लिष्टं रूप्यस्फटिकसन्निभम्॥ **3.73.17** ॥

अथ पुष्करपर्णेन लक्ष्मणः पाययिष्यति।
स्थूलान् गिरिगुहाशय्यान् वानरान् वनचारिणः॥ **3.73.18** ॥

सायाह्ने विचरन् राम दर्शयिष्यति लक्ष्मणः।
अपां लोभादुपावृत्तान् वृषभानिव नर्दतः॥ **3.73.19** ॥

स्थूलान् पीतांश्च पम्पायां द्रक्ष्यसि त्वं नरोत्तम।
सायाह्ने विचरन् राम विटपी माल्यधारिणः॥ **3.73.20** ॥

शिवोदकं च पम्पायां दृष्ट्वा शोकं विहास्यसि।
सुमनोभिश्चितास्तत्र तिलका नक्तमालकाः॥ **3.73.21** ॥

उत्पलानि च फुल्लानि पङ्कजानि च राघव।
न तानि कश्चिन्माल्यानि तत्रारोपयिता नरः॥ **3.73.22** ॥

न च वै म्लानतां यान्ति न च शीर्यन्ति राघव।
मतङ्गशिष्यास्तत्रासन्नृषयः सुसमाहिताः॥ **3.73.23** ॥

तेषां भाराभितप्तानां वन्यमाहरतां गुरोः।
ये प्रपेतुर्महीं तूर्णं शरीरात् स्वेदबिन्दवः॥ **3.73.24** ॥

तानि माल्यानि जातानि मुनीनां तपसा तदा।
स्वेदबिन्दुसमुत्थानि न विनश्यन्ति राघव॥ **3.73.25** ॥

तेषां गतानामद्यापि दृश्यते परिचारिणी।
श्रमणी शबरी नाम काकुत्स्थ चिरजीविनी॥ **3.73.26** ॥

त्वां तु धर्मे स्थिता नित्यं सर्वभूतनमस्कृतम्।
दृष्ट्वा देवोपमं राम स्वर्गलोकं गमिष्यति॥ **3.73.27** ॥

ततस्तद्राम पम्पायास्तीरमाश्रित्य पश्चिमम्।
आश्रमस्थानमतुलं गुह्यं काकुत्स्थ पश्यसि॥ **3.73.28** ॥

न तत्राक्रमितुं नागाः शक्नुवन्ति तदाश्रमे।
ऋषेस्तस्य मतङ्गस्य विधानात् तच्च काननम्॥ **3.73.29** ॥

मतङ्गवनमित्येव विश्रुतं रघुनन्दन।
तस्मिन् नन्दनसङ्काशे देवारण्योपमे वने ॥ **3.73.30** ॥

नानाविहगसङ्कीर्णे रंस्यसे राम निर्वृतः।
ऋष्यमूकस्तु पम्पायाः पुरस्तात् पुष्पितद्रुमः ॥ **3.73.31** ॥

सुदुःखारोहणश्चैव शिशुनागाभिरक्षितः।
उदारो ब्रह्मणा चैव पूर्वकालेऽभिनिर्मितः ॥ **3.73.32** ॥

शयानः पुरुषो राम तस्य शैलस्य मूर्धनि।
यत् स्वप्नं लभते वित्तं तत् प्रबुद्धोऽधिगच्छति ॥ **3.73.33** ॥

यस्त्वेनं विषमाचारः पापकर्माधिरोहति।
तत्रैव प्रहरन्त्येनं सुप्तमादाय राक्षसाः ॥ **3.73.34** ॥

तत्रापि शिशुनागानामाक्रन्दः श्रूयते महान्।
क्रीडतां राम पम्पायां मतङ्गाश्रमवासिनाम् ॥ **3.73.35** ॥

सक्ता रुधिरधाराभिः संहत्य परमद्विपाः।
प्रचरन्ति पृथक्कीर्णा मेघवर्णास्तरस्विनः ॥ **3.73.36** ॥

ते तत्र पीत्वा पानीयं विमलं चारु शोभनम्।
अत्यन्तसुखसंस्पर्शं सर्वगन्धसमन्वितम् ॥ **3.73.37** ॥

निर्वृत्ताः संविगाहन्ते वनानि वनगोचराः।
ऋक्षांश्च द्वीपिनश्चैव नीलकोमलकप्रभान् ॥ **3.73.38** ॥

रुरूनपेतानजयान् दृष्ट्वा शोकं प्रहास्यसि।
राम तस्य तु शैलस्य महती शोभते गुहा ॥ **3.73.39** ॥

शिलापिधाना काकुत्स्थ दुःखं चास्याः प्रवेशनम्।
तस्या गुहायाः प्राग्द्वारे महाञ्शीतोदको ह्रदः ॥ **3.73.40** ॥

बहुमूलफलो रम्यो नानानगसमाकुलः।
तस्यां वसति धर्मात्मा सुग्रीवः सह वानरैः ॥ **3.73.41** ॥

कदाचिच्छिखरे तस्य पर्वतस्यापि तिष्ठति।
कबन्धस्त्वनुशास्यैवं तावुभौ रामलक्ष्मणौ ॥ **3.73.42** ॥

स्रग्वी भास्करवर्णाभः खे व्यरोचत वीर्यवान्।
तं तु खस्थं महाभागं तावुभौ रामलक्ष्मणौ ॥ **3.73.43** ॥

प्रस्थितौ त्वं व्रजस्वेति वाक्यमूचतुरन्तिके।
गम्यतां कार्यसिद्ध्यर्थमिति तावब्रवीत् स च ॥ **3.73.44** ॥

सुप्रीतौ तावनुज्ञाप्य कबन्धः प्रस्थितस्तदा ॥ **3.73.45** ॥

स तत् कबन्धः प्रतिपद्य रूपं
वृतः श्रिया भास्वरसर्वदेहः।
निदर्शयन् राममवेक्ष्य खस्थः
सख्यं कुरुष्वेति तदाभ्युवाच ॥ **3.73.46** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे त्रिसप्ततितमः सर्गः ॥